श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीकृष्णमङ्गलम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकृष्णमङ्गलम् ॥

मङ्गलं यादवेन्द्राय महनीयगुणाब्धये।
वसुदेवतनूजाय वासुदेवाय मङ्गलम्॥ १ ॥

किरीटकुण्डलभ्राजदलकैर्यन्मुखश्रिये।
श्रीवत्सकौस्तुभोद्भासि वक्षसे चास्तु मङ्गलम्॥ २ ॥

नीलाम्बुदनिकाशाय विद्युत्सदृशवाससे।
देवकीवसुदेवाभ्यां संस्तुतायास्तु मङ्गलम्॥ ३ ॥

ताभ्यां संप्रार्थितायाथ प्राकृतार्भकरूपिणे।
यशोदाय गृहं पित्रा प्रापितायास्तु मङ्गलम्॥ ४ ॥

पूतनाऽसुपयःपानपेशलायाऽसुरारिणे।
शकटासुरविध्वंसि पादपद्माय मङ्गलम्॥ ५ ॥

यशोदालोकिते स्वास्ये विश्वरूपप्रदर्शिने।
मायामानुषरूपाय माधवायास्तु मङ्गलम्॥ ६ ॥

तृणावर्तदनूजासु हारिणे शुभकारिणे।
वत्सासुरप्रभेत्रे च वत्सपालाय मङ्गलम्॥ ७ ॥

दामोदराय वीराय यमळार्जुनपातिने।
धात्राहृतानां वत्सानां रूपधर्त्रेऽस्तु मङ्गलम्॥ ८ ॥

ब्रह्मस्तुताय कृष्णाय कालीयफणनृत्यते।
दावाग्निरक्षिताशेष गोगोपालाय मङ्गलम्॥ ९ ॥

गोवर्धनाचलोद्धर्त्रे गोपीक्रीडाभिलाषिणे।
अञ्जल्याऽऽहृतवस्त्राणां सुप्रीतायास्तु मङ्गलम्॥ १० ॥

www.prapatti.com

सुदर्शनाख्यगन्धर्व शापमोक्षणकारिणे।
शङ्खचूडशिरोहर्त्रे वृषभघ्नाय मङ्गलम्॥ ११ ॥

गान्दिनीसुतसन्दृष्ट दिव्यरूपाय शौरिणे।
त्रिवक्रया प्रार्थिताय सुन्दराङ्गाय मङ्गलम्॥ १२ ॥

गन्धमाल्याम्बराढ्याय गजराजविमर्दिने।
चाणूरमुष्टिकप्राणहारिणे चास्तु मङ्गलम्॥ १३ ॥

कंसहन्त्रे जरासन्धबलमर्दन कारिणे।
मधुरापुरवासाय महाधीराय मङ्गलम्॥ १४ ॥

मुचुकुन्दमहानन्ददायिने परमात्मने।
रुक्मिणीपरिणेत्रे च सबलायास्तु मङ्गलम्॥ १५ ॥

द्वारकापुरवासाय हारनूपुरधारिणे।
सत्यभामासमेताय नरकघ्नाय मङ्गलम्॥ १६ ॥

बाणासुरकरच्छेत्रे भूतनाथस्तुताय च।
धर्माहूताय यागार्थं शर्मदायास्तु मङ्गलम्॥ १७ ॥

कारयित्रे जरासन्धवधं भीमेन राजभिः।
मुक्तैस्स्तुताय तत्पुत्रराज्यदायास्तु मङ्गलम्॥ १८ ॥

चैद्य तेजोपहर्त्रे च पाण्डवप्रियकारिणे।
कुचेलाय महाभाग्यदायिने तेऽस्तु मङ्गलम्॥ १९ ॥

देव्यष्टकसमेताय पुत्रपौत्रयुताय च।
षोडशस्त्री सहस्रैस्तु संयुतायास्तु मङ्गलम्॥ २० ॥

यश्शिष्टरक्षणपरः करुणांबुराशिः
  दुष्टासुरांशनृपतीन् विनिगृह्य शूरान्।
कष्टां दशां अपनुदन्तरसा पृथिव्याः
  पुष्टिं ददातु स हरिः कुलदैवतं नः॥ २१ ॥

॥ इति श्रीकृष्णमङ्गलम् सम्पूर्णम् ॥



www.prapatti.com